শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী চক্ররাজমঙ্গলম্ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রী চক্ররাজমঙ্গলম্ ॥

মঙ্গলং চক্ররাজায মহনীযগুণাব্ধযে।
পদ্মনাভকরাম্ভোজ পরিষ্কারায মঙ্গলম্ ॥ **1** ॥

কাশীৱিপ্লোষকারায কল্যাণগুণশালিনে।
মালিপ্রমথনাযাস্তু মহাধীরায মঙ্গলম্ ॥ **2** ॥

গজেন্দ্রার্তিহরাযাস্তু গ্রাহদ্বেধাৎৱকারিণে।
দিনাধীশতিরোধানকর্ত্রে দীপ্তায মঙ্গলম্ ॥ **3** ॥

চিত্রাকারস্ৱচারায চিত্তনির্ৱৃতিকারিণে।
নরকাসুরসংহর্ত্রে নানারূপায মঙ্গলম্ ॥ **4** ॥

চণ্ডাস্ত্রাংচিতদোর্দণ্ডখণ্ডিতামরশত্রৱে।
চামীকরনিভাঙ্গায চারুনেত্রায মঙ্গলম্ ॥ **5** ॥

চৈদ্যাসুরশিরোহর্ত্রে চন্দ্রাহ্লাদকরায তে।
শ্রীমতে চক্ররাজায শ্রিতার্তিঘ্নায মঙ্গলম্ ॥ **6** ॥

॥ ইতি শ্রী চক্ররাজমঙ্গলং সমাপ্তম্ ॥